# Dūrvā Sūktam

[KYV – TA 10-1-7&8]

ॐ सहस्रपरमा देवी शतमूला शताङ्कुरा ।
सर्वꣳ हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी ॥१॥

ॐ sahas’raparamā dēvī śhatamūlā śhatāṅ’kurā |
sar’vagm’ haratu mē pāpan’
dūr’vā dus’svap’na nāśhanī || 1 ||

काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥२॥

kāṇ’ḍāt’kāṇ’ḍāt’ prarōhan’tī
paruṣha[fp]’ paruṣha[fp]’ pari |
ēvānō dūr’vēp’ pratanu sahas’rēṇa śhatēna cha || 2 ||

या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥३॥

yā śhatēnap’ pratanōṣhi sahas’rēṇa virōhasi |
tas’yāās’tē dēvīṣh’ṭakē vidhēma haviṣhā vayam || 3 ||

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा ।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥४॥

aśh’vak’rān’tē rathak’rān’tē
viṣh’ṇuk’rāān’tē vasun’dharā |
śhirasā dhārayiṣh’yāmi
rak’ṣhas’va māām’ padēpadē || 4 ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ||